**B.A. (Honours) Semester I Examination, 2014**
**Sanskrit (Honours)**
**Paper : H-1**

**Time : Three Hours** **Full Marks : 40**

Questions are of value as indicated in the margin

1. बङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा कञ्चिदेकमनुवदत— 8

(क) ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः।।
चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात्।
रम्यमावसथं कृत्वा रममाणा वने त्रयः।।
देवगन्धर्वसंकाशास्तत्र ते न्यवसन् सुखम्।

(ख) सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान्।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः।।
सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः।।

2. अधस्तनेषु कश्चिदेकः श्लोको व्याख्यायताम्— 7

(क) बहवो दुर्लभाश्चैव ये त्वया कीर्त्तिता गुणाः।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः।।

(ख) सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः
सीताप्यनुगता रामं शशिनं रोहिणी यथा।।

(ग) प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम्।
ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम्।।

3. अधोलिखितेषु प्रश्नेषु द्वयोरुत्तरं प्रदीयताम्— 10×2=20

(क) पुराणस्य लक्षणं भेदांश्चोल्लिख्य तेषु पुराणत्रयस्य विश्लेषणं कुरुत।

(ख) संस्कृत-गद्यकाव्यस्य परिचयमेकं प्रयच्छत।

(ग) संस्कृतनाट्यस्योत्पत्तिविषयकानि मतानि समुपवर्ण्य स्वकीयः सिद्धान्तः समुपस्थाप्यताम्।

(घ) भारतस्य संस्कृतौ साहित्ये च महाभारतस्य प्रभावः समुपवर्ण्यताम्।

4. अधस्तनेषु कस्यचिदेकस्य संक्षिप्तं विवरणं प्रदीयताम्— 5

(क) ऋतुसंहारः, स्वप्नवासवदत्तम्, मृच्छकटिकम्, गीतगोविन्दम्।

---